With Blessings from Parasur-
ama Sastrigal to Chi.
M. Mukund

ॐ

# श्री वाजसनेय

( शुक्लयजुर्वेद )

# काण्वमन्त्रामृतम् ।

( रुद्र–चमक–पुरुषसूक्तादि संपुटितम् )



इञ्जिकोल्लै काण्वकुलपति श्रीचिदंबरघनपाठिमहोदयानां
अन्तेवासिना श्रीपरशुरामघनपाठिना
पुत्रेण श्रीसारनाथेन च संशोध्य
प्रकाशितम् ।

॥३५॥

# श्री वाजसनेय

( शुक्लयजुर्वेद )

# काण्वमन्त्रामृतम् ।

( रुद्र—चमक—पुरुषसूक्तादि संपुटितम् )

इञ्जिकोल्लै काण्वकुलपति श्रीचिदंबरघनपाठिमहोदयानां
अन्तेवासिना श्रीपरशुरामघनपाठिना
पुत्रेण श्रीसारनाथेन च संशोध्य
प्रकाशितम् ।

प्रकाशक :—

E. C. SARANATHAN
12-A, NEDUNCHEZHIAN STREET,
VIJAYALAKSHMI PURAM,
AMBATTUR, MADRAS - 600 053.

मूल्यम्. १० रू. काण्वशाखावेदाध्येतृणां उपकाराय।

पुस्तकप्राप्तिस्थानम्।

E. C. SARANATHAN
12-A, NEDUNCHEZHIAN STREET,
VIJAYALAKSHMI PURAM,
AMBATTUR, MADRAS - 600 053.

मुद्रक :

NEW BHARATHI VIJAYAM PRINTERS,
TRIPLICANE, MADRAS - 600 005.

ॐ

## श्रीयाज्ञवल्क्य द्वादशनामस्तोत्रम्।

वन्देऽहं मङ्गलात्मानं भास्वन्तं वेदविग्रहम्।
याज्ञवल्क्यं मुनिश्रेष्ठं जिष्णुं हरिहरप्रभम्॥

जितेन्द्रियं जितक्रोधं सदा ध्यानपरायणम्।
आनन्दनिलयं वन्दे योगानन्दमुनीश्वरम्॥

एवं द्वादशनामानि त्रिसन्ध्यं यः पठेन्नरः।
योगीश्वरप्रसादेन विद्यावान् धनवान् भवेत्॥

श्री याज्ञवल्क्य गुरुभ्यो नमः।
कण्वकात्यायनादिमहर्षिभ्यो नमः॥

इदं काण्वमन्त्रामृतम् पुगळूर्
श्रीयाज्ञवल्क्यजयन्तीमहोत्सवे
श्रीयुत चिदंबरघनपाठिमहोदयानां
शताब्दीवैभवे 12-11-1983 दिने
प्रकटितम्।

# विषयानुक्रमणिका


| | | पृष्ठम् |
|---|---|---|
| 1 | श्रीरुद्राध्यायः । | 1 |
| 2 | श्रीचमकाध्यायः । | 19 |
| 3 | पुरुषसूक्तम् । | 34 |
| 4 | महाशान्तिसूक्तम् । | 41 |
| 5 | ईशावास्योपनिषत् । | 46 |
| 6 | सूर्य सूक्तम् । | 50 |
| 7 | शिव सङ्कल्पम् । | 55 |
| 8 | अभ्यारोह जपः । | 57 |
| 9 | मण्डल ब्राह्मणम् । | 58 |
| 10 | नवग्रहसूक्तम् । | 65 |
| 11 | भद्रसूक्तम् । | 76 |
| 12 | आर्याद्वादशकम् । | 78 |
| 13 | सूर्यकवचम् । | 81 |
| 14 | श्रीसूक्तम् । | 84 |
| 15 | दुर्गासूक्तम् । | 86 |
| 16 | सरस्वतीसूक्तम् । | 87 |
| 17 | अशनि निवारण मन्त्रः । | 87 |
| 18 | आयुष्य सूक्तम् । | 88 |
| 19 | प्रातः स्मरणम् । | 89 |
| 20 | स्वापकाले जप्यमन्त्रः । | 92 |
| 21 | अधीतस्य अविस्मरण मन्त्रः । | 93 |


ॐ

श्री वाजसनेय शुक्ल यजुर्वेद काण्व

## श्री रुद्राध्यायः ।

( प्रथमोऽनुवाकः १ )

ओं नमो भगवते रुद्राय ॥

ओ३म् ॥ नमस्ते रुद्र मन्यव उतोत इषवे नमः ।

बाहुभ्यामुतते नमः ॥ १ ॥

याते रुद्र शिवा तनू रघोराऽपापकाशिनी ।

तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ॥ २ ॥

यामिषुङ्गिरिशन्त हस्ते बिभर्ष्यस्तवे ।

शिवाङ्गिरित्रताङ्कुरु माहिंसीः पुरुषञ्जगत् ॥ ३ ॥

शिवेन वचसा त्वा गिरिशाऽच्छा वदामसि ।

यथा नस्सर्वमिज्जगदयक्ष्मं सुमना असत् ॥ ४ ॥

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।

अहीꣳश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यो-

धराचीः परा सुव ॥ ५ ॥

असौ यस्ताम्रो अरुण उत बभ्रुस्सुमङ्गलः ।

येचैनꣳ रुद्रा अभितो दिक्षु श्रितास्सहस्रशो-

वैषाꣳ हेळ ईमहे ॥ ६ ॥

असौ योऽवसर्पति नीलग्रीवो विलोहितः ।

उतैनङ्गोपा अदृश्रन्नदृश्रन्नुदहार्यस्स दृष्टो मृळयाति नः ॥ ७ ॥

नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीळ्हुषे ।

अथो ये अस्य सत्वानोऽहन्तेभ्योऽकरन्नमः ॥ ८ ॥

प्र मुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् ।

याश्च ते हस्त इषवः परा ता भगवो वप ॥ ९ ॥



विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँ२ उत ।

अनेशन्नस्य या इषव आभुरस्य निषङ्गधिः ॥ १० ॥

परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।

अथो य इषुधिस्तवारे अस्मन्निधेहि तम् ॥ ११ ॥

याने हेतिर्मीळ्हुष्टम हस्ते बभूव ते धनुः ।

तयाऽस्मान्विश्वतस्त्वमयक्ष्मया परि भुज ॥ १२ ॥

अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे ।

निशीर्य शल्यानाम्मुखा शिवोनस्सुमना भव ॥ १३ ॥

नमस्त आयुधायानातताय धृष्णवे ।

उभाभ्यामुत ते नमो बाहुभ्यान्तव धन्वने ॥ १४ ॥

मा नो महान्तमुत मा नो अर्भकम्मा न उक्षन्तमुत मा न

उक्षितम् ।

मा नो वधीः पितरम्मोत मातरम्मा नः प्रियास्तन्वो रुद्र
रीरिषः ॥ १५ ॥

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु
रीरिषः ।

मा नो वीरान्रुद्र भामिनो वधीर्हविष्मन्तस्सदमित्त्वा
हवामहे ॥ १६ ॥ (१)

—o—

(द्वितीयोऽनुवाकः २)

नमो हिरण्यबाहवे सेनान्ये दिशाञ्च पतये नमो नमो-
वृक्षेभ्यो हरिकेशेभ्यः पशूनाम्पतये नमः ।

नमश्शष्पिञ्जराय त्विषीमते पथीनाम्पतये नमो नमो-
हरिकेशायोपवीतिने पुष्टानाम्पतये नमः ॥ १ ॥

नमो बभ्लुशायाव्याधिनेऽन्नानाम्पतये-
नमो नमो भवस्य हेत्यै जगताम्पतये नमः ।



नमो रुद्रायाततायिने क्षेत्राणाम्पतये
नमो नमस्सूतायाहन्त्यै वनानाम्पतये नमः ॥ २ ॥

नमो रोहिताय स्थपतये वृक्षाणाम्पतये नमो नमो-
भुवन्तये वारिवस्कृतायौषधीनाम्पतये नमः ।

नमो मन्त्रिणे वाणिजाय कक्षाणाम्पतये-
नमो नम उच्चैर्घोषायाक्रन्दयते पत्तीनाम्पतये नमः ॥ ३ ॥

नमः कृत्स्नायताय धावते सत्वनाम्पतये नमो नमस्सहमानाय-
निव्याधिन आव्याधिनीनाम्पतये नमः ।

नमः ककुभाय निषङ्गिणे स्तेनानाम्पतये-
नमो नमो निचेरवे परिचरायारण्यानाम्पतये नमः ॥ ४ ॥

नमो वञ्चते परिवञ्चते स्तायूनाम्पतये नमो नमो-
निषङ्गिण इषुधिमते तस्कराणाम्पतये नमः ।

नमस्सृकायिभ्यो जिघांसद्भ्यो मुष्णताम्पतये-

नमो नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानाम्पतये

नमः ॥ ५ ॥ (२)

—o—

(तृतीयोऽनुवाकः ३)

नम उष्णीषिणे गिरिचराय कुलुञ्चानाम्पतये-

नमो नम इषुमद्भ्यो धन्वायिभ्यश्च वो नमः ।

नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम-

आयच्छद्भ्योऽस्यद्भ्यश्च वो नमः ॥ १ ॥

नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो नमस्स्वपद्भ्यो-

जाग्रद्भ्यश्च वो नमः ।

नमश्शयानेभ्य आसीनेभ्यश्च वो नमो-

नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः ॥ २ ॥



नमस्सभाभ्यस्सभापतिभ्यश्च वो नमो-

नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमः ।

नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नम-

उगणाभ्यस्तृंहतीभ्यश्च वो नमः ॥ ३ ॥

नमो गणेभ्यो गणपतिभ्यश्च वो नमो-

नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमः ।

नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो-

नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ॥ ४ ॥

नमस्सेनाभ्यस्सेनानिभ्यश्च वो नमो-

नमो रथिभ्यो अरथेभ्यश्च वो नमः ।

नमः क्षत्तृभ्यस्सङ्ग्रहीतृभ्यश्च वो नमो नमो-

महद्भ्यो अर्भकेभ्यश्च वो नमः ॥ ५ ॥ (३)

—o—

( चतुर्थोऽनुवाकः ४ )

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः-

कुलालेभ्यः कर्मारेभ्यश्च वो नमः ।

नमो निषादेभ्यः पुञ्जिष्टेभ्यश्च वो नमो नमः-

श्वनिभ्यो मृगयुभ्यश्च वो नमः ॥ १ ॥

नमश्श्वभ्यश्श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च ।

नमश्शर्वाय च पशुपतये च नमो नीलग्रीवाय च

शितिकण्ठाय च ॥ २ ॥

नमः कपर्दिने च व्युप्तकेशाय च नमस्सहस्राक्षाय च

शतधन्वने च ।

नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय

चेषुमते च ॥ ३ ॥



नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च ।

नमो वृद्धाय च सवृधे च नमोऽग्र्याय च प्रथमाय च ॥ ४ ॥

नम आशवे चाजिराय च नमश्शीघ्र्याय च शीभ्याय च ।

नम ऊर्म्याय चावस्वन्याय च नमो नादेयाय च

द्वीप्याय च ॥ ५ ॥ (४)

——o——

( पञ्चमोऽनुवाकः ५ )

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च ।

नमो मध्यमाय चापगल्भाय च नमो जघन्याय च

बुध्न्याय च ॥ १ ॥

नमस्सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च ।

नमः श्लोक्याय चावसान्याय च नम उर्वर्याय च

खल्याय च ॥ २ ॥

नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च।

नम आशुषेणाय चाशुरथाय च नमश्शूराय चावभेदिने च ॥३॥

नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च ।

नमश्श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय

चाहनन्याय च ॥ ४ ॥

नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च ।

नमस्तीक्ष्णेषवे चायुधिने च नमस्स्वायुधाय च

सुधन्वने च ॥ ५ ॥ (५)

—o—

(षष्ठोऽनुवाकः ६ )

नमस्स्रुत्याय च पथ्याय च नमः-काट्याय च नीप्याय च ।

नमः कुल्याय च सरस्याय च नमो नादेयाय च

वैशन्ताय च ॥ १ ॥



नमः कूप्याय चावट्याय च नम ईध्रियाय चातप्याय च ।

नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय

चावर्ष्याय च ॥ २ ॥

नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च

वास्तुपाय च ।

नमस्सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च ॥ ३ ॥

नमः शङ्गवे च पशुपतये च नम उग्राय च भीमाय च ।

नमोऽग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च ॥४॥

नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ।

नमश्शम्भवे च मयोभवे च नमश्शङ्कराय च मयस्कराय च-

नमश्शिवाय च शिवतराय च ॥ ५ ॥ (६)

—o—

( सप्तमोऽनुवाकः ७ )

नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च ।

नमस्तीर्थ्याय च कूल्याय च नमश्शष्प्याय
च फेन्याय च ॥ १ ॥

नमस्सिकत्याय च प्रवाह्याय च नमः किꣳशिलाय च
क्षयणाय च ।

नमः कपर्दिने च पुलस्तिने च नम इरिण्याय
च प्रपथ्याय च ॥ २ ॥

नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च ।

नमो हृद्याय च निवेष्प्याय च नमः काट्याय च
गह्वरेष्ठाय च ॥ ३ ॥



नमः शुष्क्याय च हरित्याय च नमः पाꣳसव्याय च
रजस्याय च ।

नमो लोप्याय चोलप्याय च नम ऊर्व्याय च
सूर्व्याय च ॥ ४ ॥

नमः पर्णाय च पर्णशदाय च नम उद्गुरमाणाय
चाभिघ्नते च ।

नम आखिदते च प्रखिदते च नम इषुकृद्भ्यो धनुष्कृद्भ्यश्च
वो नमः ।

नमो वः किरिकेभ्यो देवानाꣳहृदयेभ्यो नमो-
विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नम
आनिर्हतेभ्यः ॥ ५ ॥ (७)

(अष्टमोऽनुवाकः ८)

द्रापे अन्धसस्पते दरिद्र नीललोहित ।

आसाम्प्रजानामेषाम्पशूनाम्मा भेर्मा रोङ्मो च नः

किञ्चनाऽऽममत् ॥ १ ॥

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः ।

यथा शमसद्द्विपदे चतुष्पदे विश्वम्पुष्टङ्ग्रामे

अस्मिन्ननातुरम् ॥ २ ॥

या ते रुद्र शिवा तनूश्शिवा विश्वाहा भेषजी ।

शिवा रुतस्य भेषजी तया नो मृळ जीवसे ॥ ३ ॥

परि णो हेती रुद्रस्य वृज्यात्परि त्वेषस्य दुर्मतिर्मही गात् ।

अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय

तनयाय मृळ ॥ ४ ॥



मीढुष्टम शिवतम शिवो नस्सुमना भव ।

परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आ चर

पिनाकम्बिभ्रदा गहि ॥ ५ ॥

विकिरिद्र विलोहित नमस्ते अस्तु भगवः ।

यास्ते सहस्रᳪं हेतयोऽन्यमस्मन्निवपन्तु ताः ॥ ६ ॥

सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ।

तासामीशानो भगवः पराचीना मुखा कृधि ॥ ७ ॥

असङ्ख्याता सहस्राणि ये रुद्रा अधि भूम्याम् ।

तेषाᳪं सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ८ ॥

अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि ।

तेषाᳪं सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ९ ॥

नीलग्रीवाश्शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः ।

तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १० ॥

नीलग्रीवाश्शितिकण्ठाश्शर्वा अधः क्षमाचराः ।

तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ ११ ॥

ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः ।

तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १२ ॥

ये भूतानामधिपतयो विशिखासः कपर्दिनः ।

तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १३ ॥

ये पथाम्पथिरक्षिण ऐळबृदा आयुर्युधः ।

तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १४ ॥

ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।

तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १५ ॥



येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।

तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १६ ॥

य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा वितस्थिरे ।

तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ १७ ॥

नमोऽस्तु रुद्रेभ्यो ये दिवि येषाँव्वर्षमिषवः

तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ।

तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।

ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ।

नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषाँव्वात इषवः ।

तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीची
र्दशोर्ध्वाः ।

तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।

ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ।

नमोऽस्तु रुद्रेभ्यो ये पृथिव्यॉय्येषामन्नमिषवः ।

तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ।

तेभ्यो नमो अस्तु ते नो मृळयन्तु ते नोऽवन्तु ।

ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥ १८ ॥ (८)

ओं नमो भगवते रुद्राय ।

नमस्तेषोळश (१६) नमोहिरण्यबाहवे (५) उष्णीषिणे (५) तक्षभ्यः (५) ज्येष्ठाय (५) सुत्याय (५) पार्यायेति पञ्चपञ्च (५) द्रापे अन्धस इत्यष्टादश (१८) अष्टानुवाकेषु चतुष्षष्टिः (६४)

वृक्षोभूतपथस्तीर्थमन्नमेता नमो नमो नमः ।

॥ इति श्रीरुद्राध्यायः ॥

—o—

ॐ

# श्री चमकाध्यायः ।

( प्रथमोऽनुवाकः १ )

इमꣴस्तन मूर्जस्वन्तन्धयापां प्रपीनमग्ने सरिरस्य मध्ये ।

उत्सञ्जुषस्व शतधारमर्वन्समुद्रियꣳ सदनमा विशस्व ॥ १ ॥

घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ।

अनुष्वधमा वह मादयस्व स्वाहाकृतँव्वृषभ वक्षि हव्यम् ॥२॥

समुद्रादूर्मिर्मधुमाँ२ उदारदुपाꣳशुना सममृतत्वमानट् ।

घृतस्य नाम गुह्यँय्यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥३॥

वयन्नाम प्र ब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः ।

उप ब्रह्मा शृणवच्छस्यमानञ्चतुश्शृङ्गोऽवमीद्गौर एतत् ॥ ४ ॥

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।

त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ२आ विवेश ॥५॥

त्रिधा हितम्पणिभिर्गुह्यमानङ्गवि देवासो घृतमन्वविन्दन् ।

इन्द्र एकꣳ सूर्य एकञ्जजान वेनादेकꣳ स्वधया निष्टतक्षुः ॥६॥

एता अर्षन्ति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे ।

घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्य

आसाम् ।

सम्यक्स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः ।

एते अर्षन्त्यूर्मयो घृतस्य मृगा इव क्षिपणोरीषमाणाः ॥ ७ ॥

सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ।

घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः

पिन्वमानः ॥ ८ ॥



अभि प्रवन्त समनेव योषाः कल्याण्यस्स्मयमानासो अग्निम् ।

घृतस्य धारास्समिधो नसन्त ता जुषाणो हर्यति

जातवेदाः ॥ ९ ॥

कन्याइव वहतु मेतवा उ अञ्ज्यञ्जाना अभि चाकशीमि ।

यत्र सोमस्सूयते यत्र यज्ञो घृतस्य धारा

अभि तत्पवन्ते ॥ १० ॥

अभ्यर्षत सुष्टुतिङ्गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।

इमं यज्ञन्नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥ ११ ॥

धामन्ते विश्वं भुवनमधि श्रितमन्तस्समुद्रे हृद्यन्तरायुषि ।

अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तन्त

ऊर्मिम् ॥ १२ ॥ (१)

—o—

(द्वितीयोऽनुवाकः २)

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे।

धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे।

श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे स्वश्च मे यज्ञेन
कल्पन्ताम् ॥ १ ॥

प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसु च मे।

चित्तश्च म आधीतश्च मे वाक्च मे मनश्च मे।

चक्षुश्च मे श्रोत्रश्च मे दक्षश्च मे बलश्च मे यज्ञेन
कल्पन्ताम् ॥ २ ॥

ओजश्च मे सहश्च म आत्मा च मे तनूश्च मे।

शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थीनि च मे।

परूꣳषि च मे शरीराणि च म आयुश्च मे जरा च मे यज्ञेन
कल्पन्ताम् ॥ ३ ॥



ज्यैष्ठ्यश्च म आधिपत्यश्च मे मन्युश्च मे भामश्च मे।

अमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे

वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे।

वृद्धश्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥ ४ ॥ (२)

(तृतीयोऽनुवाकः ३)

सत्यश्च मे श्रद्धा च मे जगच्च मे धनश्च मे।

विश्वश्च मे महश्च मे क्रीळा च मे मोदश्च मे।

जातश्च मे जनिष्यमाणश्च मे सूक्तश्च मे सुकृतश्च मे
यज्ञेन कल्पन्ताम् ॥ १ ॥

वित्तश्च मे वेद्यश्च मे भूतश्च मे भविष्यच्च मे।

सुगश्च मे सुपथ्यश्च म ऋद्धश्च म ऋद्धिश्च मे।

क्लृप्तश्च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञेन
कल्पन्ताम् ॥ २ ॥

यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे ।
विश्वञ्च मे महश्च मे सँविच्च मे ज्ञात्रञ्च मे ।
सूश्च मे प्रसूश्च मे सीरञ्च मे लयश्च मे यज्ञेन कल्पन्ताम् ॥ ३ ॥

शञ्च मे मयश्च मे प्रियञ्च मेऽनुकामश्च मे ।
कामश्च मे सौमनसश्च मे भगश्च मे द्रविणञ्च मे ।
भद्रञ्च मे श्रेयश्च मे वसीयश्च मे यशश्च मे
यज्ञेन कल्पन्ताम् ॥ ४ ॥ (३)

—o—

(चतुर्थोऽनुवाकः ४)

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे ।
घृतञ्च मे मधु च मे सग्धिश्च मे सपीतिश्च मे ।



कृषिश्च मे वृष्टिश्च मे जैत्रञ्च म औद्भिद्यञ्च मे यज्ञेन
कल्पन्ताम् ॥ १ ॥

ऋतञ्च मेऽमृतञ्च मेऽयक्ष्मञ्च मेऽनामयच्च मे ।
जीवातुश्च मे दीर्घायुत्वञ्च मेऽनमित्रञ्च मेऽभयञ्च मे ।
सुगञ्च मे शयनञ्च मे सूषा च मे सुदिनञ्च मे यज्ञेन
कल्पन्ताम् ॥ २ ॥

रयिश्च मे रायश्च मे पुष्टञ्च मे पुष्टिश्च मे ।
विभु च मे प्रभु च मे पूर्णञ्च मे पूर्णतरञ्च मे ।
कुयवञ्च मेऽक्षितं च मेऽन्नञ्च मेऽक्षुच्च मे यज्ञेन
कल्पन्ताम् ॥ ३ ॥

व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे ।
मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च मे ।
श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे
मसूराश्च मे यज्ञेन कल्पन्ताम् ॥ ४ ॥ (४)

(पञ्चमोऽनुवाकः ५)

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे।

सिकताश्च मे वनस्पतयश्च मे हिरण्यश्च मेऽयश्च मे।

सीसश्च मे त्रपु च मे श्यामश्च मे लोहश्च मे यज्ञेन

कल्पन्ताम् ॥ १ ॥

अग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे।

कृष्टपच्याश्च मेऽकृष्टपच्याश्च मे ग्राम्याश्च मे

पशव आरण्याश्च मे।

वित्तञ्च मे वित्तिश्च मे भूतञ्च मे भूतिश्च मे यज्ञेन

कल्पन्ताम् ॥ २ ॥

वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मे।

अर्थश्च मे यामश्च म इत्या च मे गतिश्च मे यज्ञेन

कल्पन्ताम् ॥ ३ ॥ (५)

—o—



(षष्ठोऽनुवाकः ६)

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे।

सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे।

पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे यज्ञेन

कल्पन्ताम् ॥ १ ॥

मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे।

धाता च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे।

मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे यज्ञेन

कल्पन्ताम् ॥ २ ॥

पृथिवी च म इन्द्रश्च मेऽन्तरिक्षञ्च म इन्द्रश्च मे।

द्यौश्च म इन्द्रश्च मे समाश्च म इन्द्रश्च मे।

नक्षत्राणि च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे यज्ञेन

कल्पन्ताम् ॥ ३ ॥ (६)

—o—

(सप्तमोऽनुवाकः ७)

अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च मे ।

उपाꣳशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च मे ।

आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे-

मन्थी च मे यज्ञेन कल्पन्ताम् ॥ १ ॥

आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्चमे वैश्वानरश्च मे ।

ऐन्द्राग्नश्च मे महावैश्वदेवश्च मे मरुत्वतीयाश्च मे

निष्केवल्यश्च मे ।

सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च मे

हारियोजनश्च मे यज्ञेन कल्पन्ताम् ॥ २ ॥

स्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ।

ग्रावाणश्च मेऽधिषवणे च मे पूतभृच्च म आधवनीयश्च मे ।



वेदिश्च मे बर्हिश्च मे स्वगाकारश्च मेऽवभृथश्च मे यज्ञेन

कल्पन्ताम् ॥ ३ ॥

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे ।

प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे ।

दितिश्च मे द्यौश्च मेऽङ्गुलयश्शक्वरयो दिशश्च मे यज्ञेन

कल्पन्ताम् ॥ ४ ॥

व्रतश्च म ऋतवश्च मे सँव्वत्सरश्च मे तपश्च मे ।

अहोरात्रे ऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन

कल्पन्ताम् ॥ ५ ॥ (७)

—o—

(अष्टमोऽनुवाकः ८)

एका च मे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च मे

सप्त च मे सप्त च मे नव च मे नव च म एकादश च म

एकादश च मे त्रयोदश च मे त्रयोदश च मे ।

पञ्चदश च मे पञ्चदश च मे सप्तदश च मे-
सप्तदश च मे नवदश च मे नवदश च म एकविꣳशतिश्च म
एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे त्रयोविꣳशतिश्च मे ।
पञ्चविꣳशतिश्च मे पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे
सप्तविꣳशतिश्च मे नवविꣳशतिश्च मे नवविꣳशतिश्च म-
एकत्रिꣳशच्च म एकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च मे
यज्ञेन कल्पन्ताम् ॥ १ ॥

चतस्रश्च मेऽष्टौ च मेऽष्टौ च मे द्वादश च मे द्वादश च मे-
षोळश च मे षोळश च मे विꣳशतिश्च मे विꣳशतिश्च मे-
चतुर्विꣳशतिश्च मे चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च
मेऽष्टाविꣳशतिश्च मे ।



द्वात्रिꣳशच्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे-
षट्त्रिꣳशच्च मे चत्वारिꣳशच्च मे चत्वारिꣳशच्च मे-
चतुश्चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मेऽष्टाचत्वारिꣳशच्च मे
यज्ञेन कल्पन्ताम् ॥ २ ॥

त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे ।
पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे ।
तुर्यवाट् च मे तुर्यौही च मे यज्ञेन कल्पन्ताम् ॥ ३ ॥

पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च मे ।
ऋषभश्च मे वेहच्च मेऽनड्वाꣳश्च मे धेनुश्च मे यज्ञेन
कल्पन्ताम् ॥ ४ ॥ (८)

——o——

(नवमोऽनुवाकः ९)

वाजाय स्वाहा प्रसवाय स्वाहाऽपिजाय स्वाहा क्रतवे स्वाहा ।

वसवे स्वाहाऽहर्पतये स्वाहा ।

अह्ने मुग्धाय स्वाहा मुग्धाय वैनꣳशिनाय स्वाहा विनꣳशिन-

आन्त्यायनाय स्वाहाऽन्त्याय भौवनाय स्वाहा भुवनस्य पतये-

स्वाहाऽधिपतये स्वाहा प्रजापतये स्वाहा ॥ १ ॥

इयन्ते राण्मित्राय यन्ताऽसि यमनः ।

ऊर्जे त्वा वृष्टयै त्वा प्रजानान्त्वाऽऽधिपत्याय ॥ २ ॥

आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन-

कल्पताꣳ श्रोत्रँयज्ञेन कल्पताम् ।

वाग्यज्ञेन कल्पतां मनो यज्ञेन कल्पतामात्मा यज्ञेन-

कल्पतां पृष्ठँयज्ञेन कल्पताम् ।



ब्रह्म यज्ञेन कल्पताँयज्ञो यज्ञेन कल्पताञ्ज्योतिर्यज्ञेन

कल्पताꣳस्वर्यज्ञेन कल्पताम् ॥ ३ ॥

स्तोमश्च यजुश्च ऋक्च साम च बृहच्च रथन्तरञ्च ।

स्वर्देवा अगन्मामृता अभूम प्रजापतेः प्रजा

अभूम वेट् स्वाहा ॥ ४ ॥ (९)

इमꣳस्तनन्द्वादश (१२) वाजश्चतस्रः (४) सत्यं च (४)
ऊर्क्च (४) अश्माच तिस्रः (३) द्वितीयोऽग्निश्च (३)
अꣳशुःपञ्च (५) एकाचतस्रः (४) वाजाय स्वाहेतिच (४)
नवानुवाकेषु त्रयश्चत्वारिꣳशत् (४३) देवसवितरिमꣳस्तनन्त्र-
यश्चत्वारिꣳशत् (४३)

वाजः प्राण ओजो ज्यैष्ठ्यं, सत्यं वित्तं यन्ता शञ्च,
ऊक्चृतं, रयिर्व्रीहयः, अश्माचाग्निर्वैसुश्चाग्निः
मित्रः पृथिवी, अꣳशुराग्रयणः, स्रुचोऽग्निः,
व्रतमेका चतस्रः, त्र्यविः पष्ठवाट्, वाजायेयन्ते,
आयुर्यज्ञेनस्तोमश्च ॥

॥ इति चमकाध्यायः ॥

ॐ

# पुरुषसूक्तम् ।

( प्रथमोऽनुवाकः १ )

ओं सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात् ।
स भूमिꣳ सर्वतस्स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥
पुरुष एवेदꣳ सर्वँ य्यद्भूतँय्यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥
एतावानस्य महिमाऽतो ज्यायाꣳश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥ ३ ॥
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ्व्यक्रामत्साशनानशने अभि ॥ ४ ॥
ततो विराळजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ५ ॥



तस्माद्यज्ञात्सर्वहुतस्सम्भृतम्पृषदाज्यम् ।
पशूꣳस्ताꣳश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥ ६ ॥
तस्माद्यज्ञात्सर्वहुत ऋचस्सामानि जज्ञिरे ।
छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥
तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः
तँय्यज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ ९ ॥
यत्पुरुषँव्यदधुः कतिधा व्यकल्पयन् ।
मुखङ्किमस्यासीत्किं बाहू किमूरू पादा उच्येते ॥ १० ॥
ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रो अजायत ॥ ११ ॥

चन्द्रमा मनसो जातश्चक्षोस्सूर्यो अजायत ।

श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ १२ ॥

नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौस्समवर्तत ।

पद्भ्याम्भूमिर्दिशश्श्रोत्रात्तथा लोकाँ२अकल्पयन् ॥ १३ ॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।

वसन्तोऽस्यासीदाज्यङ्ग्रीष्म इध्मश्शरद्धविः ॥ १४ ॥

सप्तास्यासन्परिधयस्त्रिस्सप्त समिधः कृताः ।

देवा यद्यज्ञन्तन्वाना अबध्नन्पुरुषम्पशुम् ॥ १५ ॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।

ते ह नाकम्महिमानस्सचन्त यत्र पूर्वे साध्यास्सन्ति

देवाः ॥ १६ ॥ (१)

॥ इति पुरुषसूक्तम् ॥

—o—



## उत्तरनारायणम् ।

( द्वितीयोऽनुवाकः २ )

अद्भ्यस्सम्भूतः पृथिव्यै रसाच्च विश्वकर्मणस्समवर्तताग्रे ।

तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ १ ॥

वेदाहमेतम्पुरुषम्महान्तमादित्यवर्णन्तमसः परस्तात् ।

तमेव विदित्वाऽति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ २ ॥

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा वि जायते ।

तस्य योनिम्परि पश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि

विश्वा ॥ ३ ॥

यो देवेभ्य आतपति यो देवानाम्पुरोहितः ।

पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥ ४ ॥

रुचम्ब्राह्मञ्जनयन्तो देवा अग्रे तदब्रुवन् ।

यस्त्वैवम्ब्राह्मणो विद्यात्तस्य देवा असन्वशे ॥ ५ ॥

श्रीश्च ते लक्ष्मीश्च पत्न्यौ अहोरात्रे पार्श्वे नक्षत्राणि

रूपमश्विनौ व्यात्तम् ।

इष्णन्निषाणामुम्म इषाण सर्वलोकम्म इषाण ॥ ६ ॥ (२)

॥ इति उत्तरनारायणम् ॥

---

## सर्वमेधानुवाकः ।

( तृतीयोऽनुवाकः ३ )

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः ।

तदेव शुक्रन्तद्ब्रह्म तदापस्तत्प्रजापतिः ॥ १ ॥

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि ।

नैनमूर्ध्वन्न तिर्यञ्चन्न मध्ये परि जग्रभत् ॥ २ ॥

न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः ।

हिरण्य गर्भ इत्येषः ॥ ३ ॥



एषो ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातस्स उ गर्भे अन्तः ।

स एव जातस्स जनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतोमुखः ।

यस्मान्न जात इत्येषः ॥ ४ ॥

वेनस्तत्पश्यन्निहितङ्गुहा सद्यत्र विश्वम्भवत्येकनीळम् ।

तस्मिन्निदꣳ सञ्च विचैति सर्वꣳ स ओतः प्रोतश्च

विभूः प्रजासु ॥ ५ ॥

प्रतद्वोचेदमृतन्नु विद्वान्गन्धर्वो धाम विभृतङ्गुहा सत् ।

त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुः

पिताऽसत् ॥ ६ ॥

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा ।

यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त ॥ ७ ॥

परीत्य भूतानि परीत्य लोकान्परीत्य सर्वाः प्रदिशो दिशश्च ।

उपस्थाय प्रथमजामृतस्याऽऽत्मनाऽऽत्मानमभि सँविवेश ॥८॥

परि द्यावापृथिवी सद्य इत्वा परि लोकान्परि दिशः परि स्वः ।

ऋतस्य तन्तुँविततँविचृत्य तदपश्यत्तदभवत्तदासीत् ॥ ९ ॥

सदसस्पतिमद्भुतम्प्रियमिन्द्रस्य काम्यम् ।

सनिम्मेधामयासिषꣳ स्वाहा ॥ १० ॥

याम्मेधान्देवगणाः पितरश्चोपासते ।

तयामामद्य मेधयाऽग्ने मेधाविनङ्कुरु स्वाहा ॥ ११ ॥

इदं मे ब्रह्म च क्षत्रञ्चोभे श्रियमश्नुताम् ।

मयि देवा दधतु श्रियमुत्तमान्तस्यै ते स्वाहा ॥ १२ ॥ (३)

इति सर्वमेधानुवाकः ॥

—o—

ॐ

## महाशान्तिसूक्तम् ।

ओम् ऋचँव्वाचम्प्र पद्ये मनो यजुः प्र पद्ये साम

प्राणम्प्र पद्ये चक्षुश्श्रोत्रम्प्र पद्ये ।

वागोजस्सहौजो मयि प्राणापानौ ॥ १ ॥

यन्मे च्छिद्रञ्चक्षुषो हृदयस्य मनसो वाऽतितृण्णम्बृहस्पतिर्मे

तद्दधातु ।

शन्नो भवतु भुवनस्य यस्पतिः ॥ २ ॥

भूर्भुवस्स्वः ।

तत्सवितुर्वरेण्यम्भर्गो देवस्य धीमहि ।

धियो यो नः प्रचोदयात् ॥ ३ ॥

कया नश्चित्र आ भुवदूती सदावृधस्सखा ।

कया शचिष्ठया वृता ॥ ४ ॥

कस्त्वा सत्यो मदानाम्मंहिष्ठो मत्सदन्धसः ।

दृळ्हा चिदारुजे वसु ॥ ५ ॥

अभीषुणस्सखीनामविता जरितृणाम् ।

शतम्भवास्यूतिभिः ॥ ६ ॥

कया त्वन्न उत्याऽभि प्र मन्दसे वृषन् ।

कया स्तोतृभ्य आ भर ॥ ७ ॥

इन्द्रो विश्वस्य राजति ।

शन्नो अस्तु द्विपदे शञ्चतुष्पदे ॥ ८ ॥

शन्नो मित्रश्शँव्वरुणश्शन्नो भवत्वर्यमा ।

शन्न इन्द्रो बृहस्पतिश्शन्नो विष्णुरुरुक्रमः ॥ ९ ॥

शन्नो वातः पवताꣳशन्नस्तपतु सूर्यः ।

शन्नः कनिक्रदद्देवः पर्जन्यो अभि वर्षतु ॥ १० ॥



अहानि शम्भवन्तु नश्शꣳरात्रिः प्रति धीयताम् ।

शन्न इन्द्राग्नी भवतामवोभिश्शन्न इन्द्रावरुणा रातहव्या ।

शन्न इन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय

शँय्योः ॥ ११ ॥

शन्नो देवीरभिष्टय आपो भवन्तु पीतये ।

शँय्योरभि स्रवन्तु नः ॥ १२ ॥

स्योना पृथिवि नो भवानृक्षरा निवेशनी ।

यच्छा नश्शर्म सप्रथाः ॥ १३ ॥

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ।

महे रणाय चक्षसे ॥ १४ ॥

योवश्शिवतमो रसस्तस्य भाजयतेह नः ।

उशतीरिव मातरः ॥ १५ ॥

तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ ।

आपो जनयथा च नः ॥ १६ ॥

द्यौश्शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापश्शान्तिरोष-

धयश्शान्तिः ।

वनस्पतयश्शान्तिश्शान्तिरेव शान्तिः ॥ १७ ॥

धृते दृꣳह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् ।

मित्रस्याहञ्चक्षुषा सर्वाणि भूतानि समीक्षे ।

मित्रस्य चक्षुषा समीक्षामहे ॥ १८ ॥

धृते दृꣳह मा ।

ज्योक्ते सन्दृशि जीव्यासञ्ज्योक्ते सन्दृशि जीव्यासम् ॥ १९ ॥

नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे ।

अन्याꣳस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ

शिवो भव ॥ २० ॥



नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे ।

नमस्ते भगवन्नस्तु यतस्स्वस्समीहसे ॥ २१ ॥

यतो यतस्समीहसे ततो नो अभयङ्कुरु ।

शन्नः कुरु प्रजाभ्योऽभयन्नः पशुभ्यः ॥ २२ ॥

सुमित्रिया न आप ओषधयस्सन्तु दुर्मित्रियास्तस्मै सन्तु ।

योऽस्मान्द्वेष्टि यञ्च वयन्द्विष्मः ॥ २३ ॥

तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ।

पश्येम शरदश्शतञ्जीवेम शरदश्शतꣳ-

शृणुयाम शरदश्शतम् ॥ २४ ॥ (१) ओम् ॥

॥ इति महाशान्तिसूक्तम् ॥

ऋचꣳवाचमित्येकानुवाके चतुर्विꣳशतिः (२४)

—o—

ॐ

# ईशावास्योपनिषत् ।

ओ३म् पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ओं शान्तिः शान्तिः शान्तिः ॥

ओम् ईशावास्यमिदꣳ सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥ १ ॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः ।
एवन्त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ २ ॥

असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
ताꣳस्ते प्रेत्यापि गच्छन्ति ये के चात्महनो जनाः ॥ ३ ॥

अनेजदेकम्मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥ ४ ॥



तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥ ५ ॥

यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति ।
सर्वभूतेषु चात्मानन्ततो न विजुगुप्सते ॥ ६ ॥

यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कश्शोक एकत्वमनुपश्यतः ॥ ७ ॥

सपर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूस्स्वयम्भूर्याथातथ्यतोऽर्थान्व्यदधाच्छा-
श्वतीभ्यस्समाभ्यः ॥ ८ ॥

अन्धन्तमः प्र विशन्ति येऽविद्यामुपासते ।
ततो भूयइव ते तमो य उ विद्यायाꣳ रताः ॥ ९ ॥

अन्यदेवाहुर्विद्ययाऽन्यदाहुरविद्यया ।

इति शुश्रुम धीराणाँय्येनस्तद्विचचक्षिरे ॥ १० ॥

विद्याञ्चाविद्याञ्च यस्तद्वेदोभयꣳ सह ।

अविद्यया मृत्युन्तीर्त्वा विद्ययाऽमृतमश्नुते ॥ ११ ॥

अन्धन्तमः प्र विशन्ति येऽसम्भूतिमुपासते ।

ततो भूयइव ते तमो य उ सम्भूत्याꣳ रताः ॥ १२ ॥

अन्यदेवाहुस्सम्भवादन्यदाहुरसम्भवात् ।

इति शुश्रुम धीराणाँय्ये नस्तद्विचचक्षिरे ॥ १३ ॥

सम्भूतिञ्च विनाशञ्च यस्तद्वेदोभयꣳ सह ।

विनाशेन मृत्युन्तीर्त्वा सम्भूत्याऽमृतमश्नुते ॥ १४ ॥

हिरण्मयेन पात्रेण सत्यस्यापिहितम्मुखम् ।

तत्त्वम्पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ १५ ॥



पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्त्समूह-

तेजो यत्ते रूपङ्कल्याणतमन्तत्ते पश्यामि ।

योऽसावसौ पुरुषस्सोऽहमस्मि ॥ १६ ॥

वायुरनिलममृतमथेदम्भस्मान्तꣳ शरीरम् ।

ॐ ३क्रतो स्मर कृतꣳ स्मर क्रतो स्मर कृतꣳ स्मर ॥ १७ ॥

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।

युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते

नमउक्तिँव्विधेम ॥ १८ ॥ (१)

ओ३म् पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ओं शान्तिः शान्तिः शान्तिः ॥

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंश-ऋषिभ्यो नमो गुरुभ्यः । सर्वोपप्लवरहितप्रज्ञानघनप्रत्यगर्थो ब्रह्मैवाहमस्मि — ब्रह्मैवाहमस्मि ॥

इति ईशावास्योपनिषत्

ईशावास्यमित्येकानुवाके अष्टादश ॥ १८ ॥

इति शुक्लयजुर्वेद काण्वसंहितायां चत्वारिंशोऽध्यायः ॥

—o—

## सूर्यसूक्तम् ।

ॐ विभ्राड्बृहत्पिबतु सोम्यम्मध्वायुर्दधद्यज्ञपता अविह्रुतम् ।
वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा
वि राजति ॥ १ ॥
उदुत्यञ्जातवेदसन्देवँवहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ॥ २ ॥
येना पावक चक्षसा भुरण्यन्तञ्जनाँ२ अनु ।
त्वँव्वरुण पश्यसि ॥ ३ ॥



दैव्या अध्वर्यू आगतँ रथेन सूर्यत्वचा ।
मध्वा यज्ञँ समञ्जाथे ।
तम्प्रत्नथाऽयँव्वेनश्चोदयच्चित्रन्देवानाम् ॥ ४ ॥
आ न इळाभिर्विदथे सुशस्ति विश्वानरस्सविता देव एतु ।
अपि यथा युवानो मत्सथा नो विश्वञ्जगदभिपित्वे
मनीषा ॥ ५ ॥
यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य ।
सर्वन्तदिन्द्र ते वशे ॥ ६ ॥
तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य ।
विश्वमा भासि रोचनम् ॥ ७ ॥
तत्सूर्यस्य देवत्वन्तन्महित्वम्मध्या कर्तोर्विततँसञ्जभार ।
यदेदयुक्त हरितस्सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥ ८ ॥

तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपङ्कृणुते द्योरुपस्थे ।

अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितस्सम्भरन्ति ॥ ९ ॥

बण्महाँ२असि सूर्य बळादित्य महाँ२असि ।

महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ२असि ॥ १० ॥

बट् सूर्य श्रवसा महाँ२असि सत्रा देव महाँ२असि ।

मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥ ११ ॥

श्रायन्तइव सूर्यँव्विश्वेदिन्द्रस्य भक्षत ।

वसूनि जाते जनमान ओजसा प्रति भागन्न दीधिम ॥ १२ ॥

अद्या देवा उदिता सूर्यस्य निरꣳहसः पिपृता निरवद्यात् ।

तन्नो मित्रो वरुणो मामहन्तामदितिस्सिन्धुः पृथिवी

उत द्यौः ॥ १३ ॥



आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च ।

हिरण्ययेन सविता रथेनाऽऽदेवो याति भुवनानि

पश्यन् ॥ १४ ॥

उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम् ।

देवन्देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ॥ १५ ॥

अदृश्रमस्य केतवो वि रश्मयो जनाँ२अनु ।

भ्राजन्तो अग्नयो यथा ।

उपयामगृहीतोऽसि सूर्याय त्वा भ्राज एष ते

योनिस्सूर्याय त्वा भ्राजे ।

सूर्य भ्राजस्वन्भ्राजस्वाꣳस्त्वन्देवेष्वसि ।

भ्राजस्वानहं मनुष्येषु भूयासम् ॥ १६ ॥

उदुत्यञ्जातवेदसन्देवँ व्वहन्ति केतवः ।

दृशे विश्वाय सूर्यम् ।

उपयामगृहीतोऽसि सूर्याय त्वा भ्राज एषते योनि स्सूर्याय
त्वा भ्राजे ।

सूर्यभ्राजस्वन्भ्राजस्वाꣳस्त्वन्देवेष्वसि ।

भ्राजस्वानहं मनुष्येषु भूयासम् ॥ १७ ॥

चित्रन्देवानामुदगादनीकञ्चक्षुर्मित्रस्य वरुणस्याग्नेः ।

आऽप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्माजगतस्तस्थुषश्च ।

उपयामगृहीतोऽसि सूर्याय त्वा भ्राज एषते योनिस्सूर्याय त्वा
भ्राजे ।

सूर्य भ्राजस्वन्भ्राजस्वाꣳस्त्वन्देवेष्वसि ।

भ्राजस्वानहं मनुष्येषु भूयासम् ॥ १८ ॥

मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि ।

द्युम्नञ्चित्रश्रवस्तमम् ॥ १९ ॥



हꣳसश्शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।

नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं
बृहत् ॥ २० ॥

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ।

पश्येम शरदश्शतञ्जीवेम शरदश्शतꣳशृणुयाम
शरदश्शतम् ॥ २१ ॥

इति सूर्यसूक्तम् ॥

## शिवसङ्कल्पम् ॥

ओं यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।

दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकं तन्मे मनश्शिवसङ्कल्पमस्तु ॥१॥

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।

यदपूर्वँ यक्षमन्तः प्रजानां तन्मे मनश्शिवसङ्कल्पमस्तु ॥२॥

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे
मनश्शिवसङ्कल्पमस्तु ॥ ३ ॥

येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता तन्मे मनश्शिवसङ्कल्पमस्तु ॥ ४ ॥

यस्मिन्नृचः साम यजूꣳषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः
यस्मिꣳश्चित्तꣳसर्वमोतं प्रजानां तन्मे
मनश्शिवसङ्कल्पमस्तु ॥ ५ ॥

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनश्शिवसङ्कल्पमस्तु ॥ ६ ॥

इति शिवसङ्कल्पम् ॥

—o—

## अभ्यारोहजपः ।

ओं अथातः पवमानानामेवाभ्यारोहस्स वै खलु प्रस्तोता साम प्रस्तौति स यत्र प्रस्तुयात्तदेतानि जपेदसतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्माऽमृतङ्गमयेति स यदाहासतो मा सद्गमयेति मृत्युर्वा असत्सदमृतं मृत्योर्माऽमृतङ्गमयामृतं मा कुर्वित्येवैतदाह तमसो मा ज्योतिर्गमयेति मृत्युर्वै तमो ज्योतिरमृतं मृत्योर्माऽमृतङ्गमयामृतं मा कुर्वित्येवैतदाह मृत्योर्माऽमृतङ्गमयेति नात्र तिरोहितमिवास्त्यथ यानीतराणि स्तोत्राणि तेष्वात्मनेऽन्नाद्यमागायेत्तस्मादु तेषु वरँ्वृणीत यङ्कामङ्कामयेत तꣳ स एष एवंविदुद्गाताऽऽत्मने वा यजमानाय वा यङ्कामङ्कामयते तमागायति तद्धैतल्लोकजिदेव न हैवाऽलोक्यताया आशाऽस्ति य एवमेतत्साम वेद ॥

इति अभ्यारोहजपः ॥

—o—

## मण्डल ब्राह्मणम्

ओ३म् पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ओं शान्तिः शान्तिः शान्तिः ॥

ॐ यदेतन्मण्डलं तपति तन्महदुक्थं ता ऋचस्स ऋचाँल्लोकोऽथ यदेतदर्चिर्दीप्यते तन्महाव्रतं तानि सामानि स साम्नाँल्लोकोऽथ य एष एतस्मिन्मण्डले पुरुषस्सोऽग्निस्तानि यजूंषि स यजुषाँल्लोकस्सैषा त्र्य्येव विद्या तपति तद्धैतदप्यविद्वांस आहु स्त्रयी वा एषा विद्या तपतीति वाग्घैव तत्पश्यन्ती वदति ॥ १ ॥

स एष एव मृत्यु र्य एष एतस्मिन्मण्डले पुरुषोऽथैतदमृतँ यदेतदर्चिर्दीप्यते तस्मान्मृत्युर्न म्रियतेऽमृते ह्यन्तस्तस्माद्दु न दृश्यतेऽमृते ह्यन्तः ॥ २ ॥



तदेष श्लोको भवत्यन्तरं मृत्योरमृतमित्यवरंह्ये तन्मृत्योऽरमृतं मृत्यावमृतमाहितमित्येतस्मिन्हि पुरुष एतन्मण्डलं प्रतिष्ठितं तपति मृत्युर्विवस्वन्तंवस्त इत्यसौ वा आदित्यो विवस्वानेष ह्यहोरात्रे विवस्ते तमेष वस्ते सर्वतो ह्येनेन परिवृतो मृत्योरात्मा विवस्वतीत्येतस्मिन्हि मण्डल एतस्य पुरुषस्यात्मैतदेष श्लोको भवति ॥ ३ ॥

तयोर्वा एतयोरुभयोरेतस्य चार्चिष एतस्य च पुरुषस्यैतन्मण्डलं प्रतिष्ठा तस्मान्महदुक्थं परस्मै न शंसेन्नेदेतां प्रतिष्ठां छिनदा इत्येतांह स प्रतिष्ठां छिन्ते यो महदुक्थं परस्मै शंसति तस्मादुक्थशसं भूयिष्ठं परिचक्षते प्रतिष्ठाच्छिन्नोहि भवतीत्यधिदैवतम् ॥ ४ ॥

अथाधियज्ञं यदेतन्मण्डलं तपत्ययं स रुक्मोऽथ यदेतदर्चिर्दीप्यत इदन्तत्पुष्करपर्णमापो ह्येता आपः पुष्करपर्णमथ य एष एतस्मिन्मण्डले पुरुषोऽयमेव सयोऽयंहिरण्मयः

पुरुषस्तदेतदेवैतत्रयꣳ सꣳस्कृत्येहोपधत्ते तद्यज्ञस्यैवानु सꣳस्था-
मूर्ध्वमुत्क्रामति तदेतमप्येति य एष तपति तस्मादग्निं नाद्रियेत
परिहन्तुममुत्र ह्येष तदा भवतीत्यु एवाधियज्ञम् ॥ ५ ॥

अथाध्यात्मं यदेतन्मण्डलं तपति यश्चैष रुक्म इदं
तच्छुक्लमक्षन्नथ यदेतदर्चिर्दीप्यते यच्चैतत्पुष्करपर्णमिदं
तत्कृष्णमक्षन्नथ य एष एतस्मिन्मण्डले पुरुषो यश्चैष हिरण्मयः
पुरुषोऽयमेव सयोऽयं दक्षिणेऽक्षन्पुरुषः ॥ ६ ॥

स एष एव लोकंपृणा तामेष सर्वोऽग्निरभिसंपद्यते
तस्यैतन्मिथुनँय्योऽयꣳ मव्येऽक्षन्पुरुषोऽर्धमुहैतदात्मनो यन्मि-
थुनँय्यदावै सह मिथुनेनाथ सर्वोऽथ कृत्स्नः कृत्स्नतायै तद्यत्ते
द्वे भवतो द्वंद्वꣳ हि मिथुनं प्रजननं तस्मा द्वे द्वे लोकंपृणे
उपधीयेते तस्मादु द्वाभ्यां द्वाभ्यां चितिं प्रणयन्ति ॥ ७ ॥

म एष एवेन्द्रो योऽयं दक्षिणेऽक्षन्पुरुषोऽथेयमिन्द्राणी
ताभ्यान्देवा एताँव्विधृतिमकुर्वन्नासिकां तस्माज्जायाया अन्ते



नाश्नीयाद्वीर्यवान्हास्माज्जायते वीर्यवन्तमुह सा जनयति
यस्या अन्ते नाश्नाति ॥ ८ ॥

तदेतद्देवव्रतꣳ राजन्यबन्धवो मनुष्याणामनुतमाङ्गोपा-
यन्ति तस्मादु तेषु वीर्यवाञ्जायतेऽमृतवाका वयसाꣳ साक्षि
प्रश्येनं जनयति तौ हृदयस्याकाशं प्रत्यवेत्य मिथुनीभवतस्तौ
यदा मिथुनस्यान्तं गच्छतोऽथ हैतत्पुरुषस्स्वपिति तद्यथा
हैवेदं मानुषस्य मिथुनस्यान्तं गत्वाऽसंविद इव भवत्येवꣳ है
वै तदसँव्विद इव भवति दैवꣳ ह्येतन्मिथुनं परमो ह्येष आनन्द-
स्तस्मादेवँव्वित्स्वप्याल्लोक्यꣳ हैते एव तद्देवते मिथुनेन प्रियेण
धाम्ना समर्धयति तस्मादुह स्वपन्तं धुरेव न बोधयेन्नेदेते
देवते मिथुनीभवन्त्यौ हिनसानीती तस्मादुहैतत्सुषुप्तुष
श्श्लेष्मणमिव मुखं भवत्येते एव तद्देवते रेतस्सिञ्च[illegible]स्माद्रेतस
इदꣳसर्वꣳ संभवति यदिदं किं च ॥ ९ ॥

स एष एव मृत्यु यं एष एतस्मिन्मण्डले पुरुषो यश्चायं
दक्षिणेऽक्षन्पुरुषस्तस्य हैतस्य हृदये पादावतिहितौ तौ

हैतदाच्छिद्योत्क्रामति स यदोत्क्रामत्यथ हैतत्पुरुषोम्रियते तस्मादुहैतत्प्रेतमाहुराच्छेद्यस्येत्येष उ एव प्राण एष हीमास्सर्वाः प्रजाः प्रणयति तस्यैते प्राणास्स्वास्स यदा स्वपित्यथैन मेते प्राणास्स्वा अपियन्ति तस्मात्स्वाप्ययस्स्वाप्ययो ह वैतꣳस्वप्न इत्याचक्षते परोक्षं परोक्षकामा हि देवाः ॥ १० ॥

स एतैस्सुप्तो न कस्यचन वेद न मनसा संकल्पयति न वाचान्नस्य रसं विजानाति न प्राणेन गन्धं विजानाति न चक्षुषा पश्यति न श्रोत्रेण शृणोत्येतꣳह्येते तदाऽपीता भवन्ति स एष एकस्सन्प्रजासु बहुधा व्याविष्टस्तस्मादेका सती लोकंपृणा सर्वमग्निमनुविभवत्यथ यदेक एव तस्मादेका ॥ ११ ॥

तदाहुरेको मृत्युर्बहवा३ इत्येकश्च बहवश्चेति ह ब्रूयाद्यदहासावमुत्र तेनैकोऽथ यदिह प्रजासु बहुधा व्याविष्टस्तेनो बहवः ॥ १२ ॥



तदाहुरन्तिके मृत्युर्दूरा३ इत्यन्तिके च दूरे चेति ह ब्रूयाद्यदहायमिहाध्यात्मं तेनान्तिकेऽथ यदमावमुत्र तेनो दूरे ॥ १३ ॥

तदेष श्लोको भवत्यन्ने मात्यपश्रितो रमानाꣳ सङ्क्षरेऽमृत इति यदेतन्मण्डलं तपति तदन्नमथ य एष एतस्मिन्मण्डले पुरुषस्सोत्ता स एतस्मिन्नन्नेऽपश्रितो मातीत्यधि दैवतम् ॥ १४ ॥

अथाध्यात्ममिदमेव शरीरमन्नमथ योऽयं दक्षिणेऽक्षन्पुरुषस्सोत्ता स एतस्मिन्नन्नेऽपश्रितो भाति ॥ १५ ॥

तमेतमग्निरित्यध्वर्यव उपासते यजुरित्येष हीदꣳ सर्वं युनक्ति सामेतिच्छन्दोगा एतस्मिन्हीदꣳसर्वꣳ समानमुक्थमिति बह्वृचा एष हीदꣳ सर्वमुत्थापयति यातुरिति यातुविद एतेनहीदꣳसर्वँ यतँव्विषमिति सर्पास्सर्प इति सर्पविद ऊर्गिति देवा रयिरिति मनुष्या मायेत्यसुरास्स्वधेति पितरो देवजन इति देवजनविदो रूपमिति गन्धर्वा गन्ध इत्यप्सरसस्तँयथायथोपासते तदेव भवति तद्धैनान्भूत्वाऽवति तस्मादेनमेवँव्वित्सर्वैरेवैतै रुपासीत सर्वꣳहैतद्भवति सर्वꣳ हैनमेतद्भूत्वाऽवति ॥ १६ ॥

स एष श्रीष्टकोऽग्निर्ऋगेका यजुरेका सामैका तद्यां कां चात्रर्चोपदधाति रुक्म एव तस्या आयतनमथ यां यजुषा पुरुष एव तस्या आयतनमथ याः साम्नापुष्करपर्णमेव तस्या आयतनमेवं श्रीष्टकस्ते वा एते उभे एष च रुक्म एतच्च पुष्करपर्णमेतं पुरुषमपीत उभे ह्यृक्सामे यजुरपीव एवम्वेकेष्टकः ॥ १७ ॥

स एष एव मृत्यु यँ एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषस्स एष एवँव्विद आत्मा भवति स यदैवंविदस्माल्लोकात्प्रैत्यथैतमेवात्मानमभिसंभवति सोऽमृतो भवति मृत्युर्ह्यँस्यात्मा भवति ॥ १८ ॥

ओ३म् पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ओ३म् शान्तिः शान्तिः शान्तिः ॥

इति काण्वशतपथब्राह्मणे अग्निरहस्य (१२) काण्डे
पञ्चमाध्याये द्वितीयं ब्राह्मणम् ॥

इति मण्डलब्राह्मणम् ।

---

## नवग्रह सूक्तम् ।

आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च ।
हिरण्ययेन सविता रथेनाऽऽदेवो याति भुवनानि
पश्यन् ॥

त्र्यम्बकँय्यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात् ॥

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि
विद्वान् ।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नमउक्तिँव्विधेम ॥

त्र्यम्बकाधिदेवतायै अग्निप्रत्यधिदेवतायै आदित्याय
नमः ॥ १ ॥

इमन्देवा असपत्नँ सुवध्वं महते क्षत्राय महते
ज्यैष्ठ्याय ।
इममुमुष्य पुत्रममुष्याः पुत्रमस्यै विशे ॥

एष वः कुरवो राजैषवः पञ्चाला राजा ।

सोमोऽस्माकं ब्राह्मणानाꣳ राजा ॥

श्रीश्च ते लक्ष्मीश्च पत्न्या अहोरात्रे पार्श्वे नक्षत्राणि रूप

मश्विनौ व्यात्तम् ।

इष्णन्निषाणामुम्म इषाण सर्वलोकम्म इषाण ॥

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ।

महे रणाय चक्षसे ॥

अप्स्वधिदेवतायै अप्प्रत्यधिदेवतायै सोमाय नमः ॥ २ ॥

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।

अपाꣳ रेताꣳसि जिन्वति ॥

यदक्रन्दः प्रथमञ्जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।

श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते

अर्वन् ।



भूम्या आखूनालभतेऽन्तरिक्षाय पाङ्क्त्रान्दिवे कशान् ।

दिग्भ्यो नकुलान्बभ्रुकानवान्तरदिशाभ्यः ॥

स्कन्दाधिदेवतायै भूमिप्रत्यधिदेवतायै अङ्गारकाय
नमः ॥ ३ ॥

उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते

सꣳसृजेथामयञ्च ।

अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च
सीदत ॥

विष्णोर्नुकँवीर्याणि प्र वोचँयः पार्थिवानि विममे

रजाꣳसि ।

यो अस्कभायदुत्तरꣳ सधस्थँविचक्रमाणस्त्रेधोरुगायो

विष्णवे त्वा ॥

विष्णोरराटमसि विष्णोश्श्नप्त्रे स्थो विष्णोस्स्यूरसि

विष्णोर्ध्रुवोऽसि ।

वैष्णवमसि विष्णवे त्वा ॥

विष्णवधिदेवतायै विष्णुप्प्रत्यधिदेवतायै बुधाय नमः ॥४

बृहस्पते अति यदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु ।

यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणन्धेहि

चित्रम् ॥

आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः ।

शूर इषव्योऽतिव्याधी महारथो जायताम् ॥

इन्द्रः पश्चादिन्द्रः पुरस्तादिन्द्रो अस्माँ२अभि पातु

विश्वतः ।

इन्द्रो जिघाꣳसतां मनाꣳसि विषूचीना व्यस्यतात् ॥

ब्रह्माधिदेवतायै इन्द्रप्प्रत्यधिदेवतायै बृहस्पतये नमः॥५

अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं

प्रजापतिः ।



ऋतेन सत्यमिन्द्रियँव्विपानꣳ शुक्र मन्धस

इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु ॥

सजोषा इन्द्र सगणो मरुद्भिस्सोमं पिब वृत्रहा शूर

विद्वान् ।

जहि शत्रूꣳ रप मृधोनुदस्वाथाऽभयङ्कृणुहि

विश्वतो नः ॥

इन्द्रन्दुरः कवष्यो धावमाना वृषाणँय्यन्तु जनय

स्सुपत्नीः ।

द्वारो देवीरभितो विश्रयन्ताꣳ सुवीरा वीरं प्रथमाना

महोभिः ॥

इन्द्राधिदेवतायै इन्द्राणीप्प्रत्यधिदेवतायै

भगवते शुक्राय नमः ॥ ६ ॥

शन्नो देवीरभिष्टय आपो भवन्तु पीतये ।

शँय्यो रभि स्रवन्तु नः ॥

यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे ।

देवस्त्वा सविता मध्वाऽनक्तु पृथिव्या स्सꣳस्पृशस्पाहि ।

अर्चिरसि शोचिरसि तपोऽसि ॥

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता

बभूव ।

यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम

पतयोरयीणाम् ॥

यमाधिदेवतायै प्रजापतिप्रत्यधिदेवतायै

शनैश्चराय नमः ॥ ७ ॥

काण्डात्काण्डात्प्ररोहन्ती परुषःपरुषस्परि ।

एवा नो दूर्वे प्र तनु सहस्रेण शतेन च ॥

कार्षिरसि समुद्रस्य त्वाऽक्षित्या उन्नयामि ।

समापो अद्भिरग्मत समोषधीभि रोषधीः ॥



नमोस्तु सर्पेभ्यो ये के च पृथिवी मनु ।

ये अन्तरिक्षे ये दिवि तेभ्यस्सर्पेभ्यो नमः ॥

कालाधिदेवतायै सर्पप्रत्यधिदेवतायै राहवे नमः ॥८॥

केतुङ्कृण्वन्नकेतवे पेशो मर्या अपेशसे ।

समुषद्भिरजायथाः ॥

चित्रावसो स्वस्ति ते पारमशीय ।

संत्वमग्ने सूर्यस्य वर्चसाऽगथास्समृषीणाꣳ स्तुतेन ॥

ब्रह्मजज्ञानं प्रथमं पुरस्ताद्वि सीमतस्सुरुचो वेन आवः ।

स बुध्न्या उपमा अस्य विष्ठास्सतश्च योनि

मसतश्च वि वः ॥

चित्रगुप्ताधिदेवतायै ब्रह्मप्रत्यधिदेवतायै केतवे नमः॥९

गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा

प्रियपतिꣳ हवामहे ।

निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम ॥
महागणपतये नमः ।

श्रीश्च ते लक्ष्मीश्च पत्न्या अहोरात्रे पार्श्वे नक्षत्राणि

रूपमश्विनौ व्यात्तम् ।

इष्णन्निषाणाऽमुम्म इषाण सर्वलोकम्म इषाण ॥
श्रियै नमः ।

इन्द्रः पश्चादिन्द्रः पुरस्तादिन्द्रो अस्माँ२अभि

पातु विश्वतः

इन्द्रो जिघाꣳसताम्मनाꣳसि विषूचीना व्यस्यतात् ।
इन्द्राय नमः ।

त्वन्नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य ।

त्राता तोकस्य तनये गवामस्यनिमेषꣳ रक्षमाण

स्तव व्रते ॥
अग्नये नमः ।



सुगन्नु पन्थां प्रदिशन्न एहि ज्योतिष्मद्ध्यजरन्न आयुः ।
अपैतु मृत्युरमृतन्न आगाद्वैवस्वतो नो अभयं कृणोतु ॥
यमाय नमः ।

असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि

तस्करस्य ।

अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते

तुभ्यमस्तु ॥
निर्ऋतये नमः ।

तत्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो

हविर्भिः ।

अहेळमानो वरुणेह बोध्युरुशꣳस मा न आयुः

प्रमोषीः ॥
वरुणाय नमः ।

आनोनियुद्भिश्शतिनीभिरध्वरꣳ सहस्रिणीभि

रुप याहि यज्ञम् ।

वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभि

स्सदा नः ॥

वायवे नमः ।

वयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः ।

प्रजावन्तस्सचेमहि ॥

सोमाय नमः ।

तमीशानञ्जगत स्तस्थुषस्पतिन्धियञ्जिन्वमवसे

हूमहे वयम् ।

पूषानो यथा वेदसामसद्वृधे रक्षिता पायु

रदब्धस्स्वस्तये ॥

ईशानाय नमः ।

अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ

सजोषाः ।



यश्शꣳसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माꣳ२

अवन्तु देवाः ॥ रुद्राय नमः ।

स्योना पृथिवि नो भवाऽनृक्षरा निवेशनी ।

यच्छा नः शर्म सप्रथाः ॥

पृथिव्यै नमः ।

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत

विश्वतस्पात् ।

सं बाहुभ्यान्धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः ॥

विश्वेभ्यो देवेभ्यो नमः ।

इदँविष्णुर्वि चक्रमे त्रेधा नि दधे पदम् ।

समूढमस्य पाꣳसुरे स्वाहा ॥

महाविष्णवे नमः ।

इति नवग्रहसूक्तम् ॥

## भद्रसूक्तम् ।

ॐ आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास
उद्भिदः ।
देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो
दिवेदिवे ॥ १ ॥

देवानाम्भद्रा सुमतिर्ऋजूयतान्देवानाꣳ रातिरभि नो
नि वर्तताम् ।
देवानाꣳ सख्यमुप सेदिमा वयन्देवा न आयुः प्र तिरन्तु
जीवसे ॥ २ ॥

तान्पूर्वया निविदा हूमहे वयम्भगम्मित्रमदितिन्दक्षमस्रिधम् ।
अर्यमणँ व्वरुणꣳ सोममश्विना सरस्वती नस्सुभगा
मयस्करत् ॥ ३ ॥



तन्नो वातो मयोभु वातु भेषजन्तन्माता पृथिवी तत्पिता द्यौः ।
तद्ग्रावाणस्सोमसुतो मयोभुवस्तदश्विना शृणुतन्धिष्ण्या
युवम् ॥ ४ ॥

तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धस्स्वस्तये ॥ ५ ॥

स्वस्ति न इन्द्रो वृद्धश्रवास्स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिस्स्वस्ति नो बृहस्पतिर्दधातु ॥ ६ ॥

पृषदश्वा मरुतः पृश्निमातरश्शुभँय्यावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवस्सूरचक्षसो विश्वे नो देवा अवसा-
ऽऽगमन्निह ॥ ७ ॥

भद्रङ्कर्णेभिश्शृणुयाम देवा भद्रम्पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेम देवहितँय्यदायुः ॥ ८ ॥

शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसन्तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥९॥

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनि-
त्वम् ॥ १० ॥

इति भद्रसूक्तम् ॥

—o—

## आर्या द्वादशकम् ।

उद्यन्नद्य विवस्वानारोहन्नुत्तरान्दिवं देवः ।
हृद्रोगं मम सूर्यो हरिमाणं चाशु नाशयतु ॥
ह्रां मित्राय नमः ॥ १ ॥

निमिषार्धेनैकेन द्वे च शते द्वे तथा सहस्रे च ।
क्रममाण योजनानां नमोऽस्तुते नलिननाथाय ॥
ह्रीं रवये नमः ॥ २ ॥



शिवरूपात्ज्ञानमहं त्वत्तो मुक्ति जनार्दनाकारात् ।
शिखिरूपाच्चैश्वर्यं भवतश्चारोग्यमिच्छामि ॥
ह्रूं सूर्याय नमः ॥ ३ ॥

कर्मज्ञानखदशकं मनश्च जीव इति विश्वसर्गाय ।
द्वादशधा यो विचरति स द्वादशमूर्तिरस्तु मुदे ॥
ह्रैं भानवे नमः ॥ ४ ॥

त्वं यजुर्ऋक्साम त्वमागमस्त्वं वषट्कारः ।
त्वं विश्वस्त्वं हंसस्त्वं भानुः परमहंसश्च ॥
ह्रौं खगाय नमः ॥ ५ ॥

त्वचि दोषा दृशि दोषा हृदि दोषा येऽखिलेन्द्रियगदोषाः ।
तान्पूषा हतदोषानीषद्रोषाग्निना दहतु ॥
ह्रः पूष्णे नमः ॥ ६ ॥

तिमिरमिव नेत्रतिमिरं पटलमिवाऽशेषरोगपटलं च ।
काचमिव धीनिकोचं कालपिता मम निराकुर्यात् ॥
ह्रां हिरण्यगर्भाय नमः ॥ ७ ॥

धर्मार्थकाममोक्षप्रतिरोधिन उग्रवेगतापकरान् ।
मन्दीकृतेन्द्रियगणान्गदान्विनाशयतु चण्डांशुः ॥
ह्रीं मरीचये नमः ॥ ८ ॥

येन विनान्धन्तिमिरं जगदेतदत्र सति धृतबोधं ।
तन्नळिनीभर्तारं हर्तारञ्चापदामीडे ॥
ह्रूं आदित्याय नमः ॥ ९ ॥

यस्य सहस्राभीशोरभीशुलेशो हिमांशुबिंबगतः ।
भासयति नक्तमखिलं खिलयतु स विपद्गणानखिलान्॥
ह्रैं सवित्रे नमः ॥ १० ॥

वाताश्मरि दुर्नामत्वग्दोषमहोदरप्रमेहांश्च ।
ग्रहिणीभगन्दराख्यान्महारुजोपि त्वमिन हरसि ॥
ह्रौं अर्काय नमः ॥ ११ ॥

त्वं शरणं त्वं माता त्वं च पिता त्वं धनं त्वमाचार्यः ।
त्वं त्राता त्वं हर्ता विपदामर्क प्रसीद मम ॥
ह्रः भास्कराय नमः ॥ १२ ॥

इत्यार्याद्वादशकं सांबस्य पुरो नभस्तलात्पतितम् ।
पठतां भाग्य समृद्धिस्सर्वगरोगक्षयश्च स्यात् ॥ १३ ॥
छायादेवीसंज्ञादेवीसमेत श्री सूर्यनारायणस्वामिने
नमः ओं नमो नारायणाय ।
मित्र रवि सूर्य भानु खग पूष हिरण्यगर्भमरीच्यादित्य
सवित्रर्क भास्करेभ्यो नमो नमः

इति आर्या द्वादशकम् ॥

—o—

## श्री याज्ञवल्क्योपदिष्टं सूर्यकवचम् ।

याज्ञवल्क्य उवाच ॥

शृणुष्व मुनिशार्दूल सूर्यस्य कवचं शुभम् ।
शरीरारोग्यदं दिव्यं सर्वसौभाग्यदायकं ॥ १ ॥

देदीप्यमानमकुटं स्फुरन्मकरकुण्डलम् ।
ध्यात्वा सहस्रकिरणं स्तोत्रमेतदुदीरयेत् ॥ २ ॥

शिरो मे भास्करः पातु ललाटं मेऽमितद्युतिः ।
नेत्रे दिनमणिः पातु श्रवणँव्वासरेश्वरः ॥ ३ ॥

घ्राणं घर्मघृणिः पातु वदनँव्वेदवाहनः ।
जिह्वां मे मानदः पातु कण्ठं मे सुरवन्दितः ॥ ४ ॥

स्कन्धौ प्रभाकरः पातु वक्षः पातु जनप्रियः ।
पातु पादौ द्वादशात्मा सर्वाङ्गं सकलेश्वरः ॥ ५ ॥

सूर्यरक्षात्मकं स्तोत्रं लिखित्वा भूर्जपत्रके ।
दधाति यः करे तस्य वशगास्सर्वसिद्धयः ॥ ६ ॥

सुस्नातो यो जपेत्सम्यग्योऽधीते स्वस्थमानसः ।
स रोगमुक्तो दीर्घायुस्सुखं पुष्टिं च विन्दति ॥ ७ ॥

इति श्री याज्ञवल्क्योपदिष्टं सूर्यकवचम् ॥

## श्रीसूक्तम् ।

ओं हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीँल्लक्ष्मीं जातवेदो म आवह ॥ १ ॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीं ।
यस्यां हिरण्यँ विन्देयं गामश्वं पुरुषानहम् ॥ २ ॥

अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीं ।
श्रियन्देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥ ३ ॥

कांसोस्मितां हिरण्यप्राकारामार्द्रांज्वलन्तीं
तृप्तान्तर्पयन्तीं ।
पद्मेस्थितां पद्मवर्णान्तामिहोपह्वये श्रियम् ॥ ४ ॥

चन्द्रां प्रभासाँय्यशसा ज्वलन्तीं श्रियँ ल्लोके
देवजुष्टामुदाराम् । तां पद्मिनीमीं शरणमहं
प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वाँव्वृणे ॥ ५ ॥

आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव
वृक्षोऽथ बिल्वः । तस्य फलानि तपसा नुदन्तु
मायान्तरायाश्च बाह्या अलक्ष्मीः ॥ ६ ॥

उपैतु मान्देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन्कीर्तिमृद्धिं ददातु मे ॥ ७ ॥



क्षुत्पिपासामलाञ्ज्येष्ठामलक्ष्मीन्नाशयाम्यहम् ।
अभूतिमसमृद्धिञ्च सर्वान्निर्णुद मे गृहात् ॥ ८ ॥
गन्धद्वारान्दुराधर्षान्नित्यपुष्टाङ्करीषिणीम् ।
ईश्वरीं सर्वभूतानां त्वामिहोपह्वये श्रियम् ॥ ९ ॥

मनसः काममाकूतिँ व्वाचस्सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयिश्रीश्श्रयतांय्यशः ॥ १० ॥

कर्दमेन प्रजा भूता मयि संभव कर्दम ।
श्रियँव्वासय मे कुले मातरं पद्ममालिनीम् ॥ ११ ॥

आपस्सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियँव्वासय मे कुले ॥ १२ ॥

आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीं ।
सुर्यां हिरण्मयीँ ल्लक्ष्मीं जातवेदो म आवह ॥ १३ ॥

आर्द्रां यः करिणीँ य्यष्टिं पिङ्गलां पद्ममालिनीं ।
चन्द्रां हिरण्मयीँ ल्लक्ष्मीं जातवेदो म आवह ॥ १४ ॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्
विन्देयं पुरुषानहम् ॥ १५ ॥

इति श्रीसूक्तम् ॥

## श्रीसूक्तफलश्रुतिः ।

यश्शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
श्रियः पञ्चदशर्चं च श्रीकामस्सततं जपेत् ॥

पद्मासने पद्मऊरु पद्माक्षि पद्मसंभवे ।
त्वं मां भजस्व पद्माक्षि येन सौख्यँल्लभाम्यहम् ॥

अश्वदायी गोदायी धनदायी महाधने ।
धनं मे जुषतां देवि सर्वकामार्थसिद्धये ॥

पुत्रपौत्रधनं धान्यं हस्त्यश्वादि गवे रथम् ।
प्रजानां भवसि माता आयुष्मन्तङ्करोतु माम् ॥

चन्द्राभां लक्ष्मीमीशानां सुर्याभां श्रियमैश्वरीम् ।
चन्द्रसूर्याग्निवर्णाभां महालक्ष्मीमुपास्महे ॥

धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ।
धनमिन्द्रो बृहस्पतिर्वरुणं धनमश्नुते ॥

वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनी ॥

न क्रोधो नच मात्सर्यं न लोभो नाशुभामतिः ।
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत्सदा ॥

वर्षन्तु ते विभावरी दिवो अभ्रस्य विद्युतः ।
रोहन्तु सर्वबीजान्युप ब्रह्मद्विषो जहि ॥



पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदलायताक्षि ।
विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥

महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥

यासापद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गंभीरावर्तनाभिस्स्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैस्स्नापिता हेमकुम्भै
र्नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गळ्ययुक्ता ॥

सिद्धलक्ष्मीर्मोक्षलक्ष्मीर्जयलक्ष्मीस्सरस्वती ।
श्रीलक्ष्मीर्वरलक्ष्मीश्च प्रसन्ना भव सर्वदा ॥

वराङ्कुशौ पाशमभीतिमुद्रां करैर्वहन्तीं कमलासनस्थाम् ।
बालार्ककोटिप्रतिमां त्रिणेत्रां भजेहमाद्यां जगदीश्वरीं ताम् ॥

सर्वमङ्गळमाङ्गळ्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यंबके देवि नारायणि नमोऽस्तुते ॥

श्रीर्वर्चस्यमायुष्यमारोग्यमाविधाच्छोभमानं महीयते ।
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

इति श्रीसूक्तफलश्रुतिः ॥

## दुर्गासूक्तम् ।

ओं जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिंधुन्दुरितात्यग्निः ।
तामग्निवर्णान्तपसाज्वलन्तीँवैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवींशरणमहं प्रपद्ये सुतरसितरसे नमः ॥
अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरतिदुर्गाणिविश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शँय्योः ॥
विश्वानि नो दुर्गहा जातवेदस्सिन्धुम्न नावा दुरितातिपर्षि ।
अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥
पृतनाजितँसहमानमुग्र मग्निँ हुवेम परमात्सधस्थात् ।
सनः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरितात्यग्निः ॥
प्रत्नोषिकमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।
स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यञ्च सौभगमायजस्व ॥
गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनुसंचरेम ।
नाकस्य पृष्ठमभिसँव्वसानो वैष्णवींल्लोक इह मादयन्ताम् ॥
कात्यायनाय विद्महे कन्यकुमारि धीमहि ।
तन्नो दुर्गिः प्रचोदयात् ॥

इति दुर्गासूक्तम् ।

## सरस्वतीसूक्तम् ।

ॐ प्र नो यच्छत्वर्यमा प्र पूषा प्र सरस्वती । प्र वाग्देवी ददातु नः ॥
अर्यमणं बृहस्पतिमिन्द्रन्दानाय चोदय ।
वाचँव्विष्णुँ सरस्वतीँ सवितारञ्च वाजिनम् ॥
चोदयित्री सूनृतानाञ्चेतन्ती सुमतीनाम् । यज्ञन्दधे सरस्वती ॥
महो अर्णस्सरस्वती प्र चेतयति केतुना । धियो विश्वा वि राजति॥

(समिद्धो अग्निरश्विना इत्यनुवाकोऽपि सरस्वतीसूक्तान्तर्गतः)

इति सरस्वतीसूक्तम् ॥

## अशनि निवारण मन्त्रः ।

शिवा नो वर्षास्सन्तु शिवा नस्सन्तु हेतयः ।
शिवा नस्तास्सन्तु यास्त्वँ सृजसि वृत्रहन् ॥
अर्जुनः फल्गुनः पार्थः किरीटी श्वेतवाहनः ।
बीभत्सुर्विजयः कृष्णस्सव्यसाची धनञ्जयः ॥

इति अशनि निवारण मन्त्रः ।

## आयुष्यसूक्तम् ।

आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः ।
पुनस्ते प्राण आयति परायक्ष्मꣳ सुवाति नः ॥

आयुष्मानग्ने हविषा वृधानो घृतप्रतीको घृतयोनिरेधि ।
घृतं पीत्वा मधु चारुगव्यं पितेव पुत्रमभि रक्षतादिमान् ॥

इति पुरोऽनुवाक्यायाज्ये ॥

यो ब्रह्मा ब्रह्मण उज्जहार प्राणैश्शिरः कृत्तिवासाः पिनाकी ।
ईशानो देवस्स न आयुर्दधातु तस्मै जुहोमि हविषा घृतेन ॥ १ ॥

विभ्राजमानस्सरिरस्य मध्याद्रोचमानो घर्मरुचिर्य आगात् ।
स मृत्युपाशादपनुद्य घोरादिहायुषे नो घृतमत्तु देवः ॥ २ ॥

ब्रह्मज्योतिर्ब्रह्मपत्नीषु गर्भँ यमादधात्पुरुरूपञ्जयन्तम् ।
सुवर्णरंभग्रहमर्कमर्च्यं तमायुषे वर्धयामो घृतेन ॥ ३ ॥

श्रियँल्लक्ष्मीमौबलामम्बिकां गां षष्ठीञ्जयामिन्द्रसेनेत्युदाहुः ।
तां विद्यां ब्रह्मयोनिꣳसरूपामिहायुषे तर्पयामो घृतेन ॥ ४ ॥

दाक्षायण्यस्सर्वयोन्यस्सयोन्यस्सहस्रशो विश्वरूपा विरूपाः ।
ससूनवस्सपतयस्सयूथ्या आयुषे नो घृतमिदं जुषन्ताम् ॥ ५ ॥

दिव्या गणा बहुरूपाः पुराणा आयुश्छिदो नः प्रमथ्नन्तु वीरान् ।
तेभ्यो जुहोमि बहुधा घृतेन मा नः प्रजाꣳरीरिषो मोत वीरान् ॥ ६ ॥



एकः पुरस्ताद्य इदं बभूव यतो बभूव भुवनस्य गोपाः ।
यमप्येति भुवनꣳसांपराये स नो हविर्घृतमिहायुषेऽत्तु देवः ॥ ७ ॥

वसून्रुद्रानादित्यान्मरुतोऽथसाध्यानृभून्यक्षान्गन्धर्वांश्च
पितृꣳश्च विश्वान् । भृगून्सर्पाꣳश्चाङ्गिरसोऽथ सर्वान्घृतꣳहुत्वा
स्वायुष्यामहयाम शश्वत् ॥ ८ ॥

विष्णो त्वं नो अन्तमश्शर्म यच्छ सहन्त्य ।
प्रते धारा मधुश्च्युत उत्सं दुह्रते अक्षितम् ॥

इति आयुष्यसूक्तम्

## प्रातः स्मरणम् ।

ब्रह्मा मुरारिस्त्रिपुरान्तकश्च भानुश्शशीभूमिसुतो बुधश्च ।
गुरुश्च शुक्रश्शनिराहुकेतवः कुर्वन्तु सर्वे मम सुप्रभातम् ॥

भृगुर्वसिष्ठः क्रतुरङ्गिराश्च मनुः पुलस्त्यः पुलहश्च गौतमः ।
रैभ्यो मरिचिश्च्यवनोऽथदक्षः कुर्वन्तु सर्वे मम सुप्रभातम् ॥

सनत्कुमारश्च सनन्दनश्च सनातनोप्यासुरिसिंहळौ च ।
सप्त स्वराः सप्त रसातलानि कुर्वन्तु सर्वे मम सुप्रभातम् ॥

सप्तार्णवास्सप्त कुलाचलाश्च सप्तर्षयो द्वीपवनानि सप्त ॥
भूरादिलोका भुवनानि सप्त कुर्वन्तु सर्वे मम सुप्रभातम् ।

महाभारतमाख्यानं क्षितिं गां च सरस्वतीम् ।
ब्राह्मणान्केशवं चैव प्रातरुत्थाय कीर्तयेत् ।

ब्रह्माणं शङ्करं विष्णुं यमं रामं दनुं बलिम् ।
सप्तैतान्संस्मरेन्नित्यं महापातक नाशनम् ॥

कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमान्हिकम् ॥

प्रह्लादनारदपराशरपुण्डरीक व्यासाम्बरीषशुक
शौनकभीष्मदाल्भ्यान् । रुक्माङ्गदार्जुनवसिष्ठ-
विभीषणादीन्पुण्यानिमान्परमभागवतान्स्मरामि ॥

पुण्यश्लोको नळोराजा पुण्यश्लोको युधिष्ठिरः ।
पुण्यश्लोको हरिश्चन्द्रः पुण्यश्लोकः पुरूरवाः ॥
पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः ॥

कार्कोटकस्य नागस्य दमयन्त्या नळस्य च ।
ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ॥

कीर्तनं पापनाशनं । कीर्तनं पुण्यवर्धनम् ।
कीर्तनं आयुष्यवर्धनम् ॥

अग्नित्रयं त्रीणि च पुष्कराणि नामत्रयं त्रीणि पदानि विष्णोः ।
रुद्रस्त्रिणेत्रस्त्रिपथा च गङ्गा एतानि दुस्स्वप्नविनाशनानि ॥



गङ्गाया दक्षिणे भागे योजनानां शतद्वये ।
पञ्चयोजनमात्रेण पूर्वाम्भोधेस्तु पश्चिमे ॥

वेगवत्युत्तरे तीरे पुण्यकोट्यां हरिस्स्वयम् ।
वरदस्सर्वभूतानामद्यापि परिदृश्यते ॥

चम्पापरिमलोल्लासवासिताधरपल्लवम् ।
स्मरतं वरदराजस्य मुग्धस्मितमुपास्महे ॥

भक्ताभीष्टफलप्रदाङ्घ्रियुगलं कौशेयराजत्कटिं
लक्ष्मीमङ्गलमन्दिरोरसि लसन्मुक्तावलीं कौस्तुभम् ।
हस्तैश्शङ्खरथाङ्ग पङ्कजगदा बिभ्राणमभ्राकृतिं
राकाचन्द्रमुखं सुजातमकुटं श्री सारनाथं भजे ॥

समुद्रवसने देवि पर्वतस्तनमण्डिते ।
विष्णुपत्नि नमस्तुभ्य पादस्पर्शं क्षमस्व मे ॥

अहल्या द्रौपदी सीता तारा मण्डोदरी तथा ।
पञ्चकन्यास्स्मरेन्नित्यं महापातक नाशनम् ॥

आदित्यमंबिकां विष्णुं गणनाथं महेश्वरम् ।
पञ्चदेवान्स्स्मरेन्नित्यं महापातकनाशनम् ॥

मैनाकं मन्दरं मेरुं कैलासं गन्धमादनम्
पञ्च शैलान्स्स्मरेन्नित्यं महापातकनाशनम् ॥

गोकोटिदानं ग्रहणेषु काले प्रयागगङ्गाऽयुतकल्पवासः ।
यज्ञायुतं मेरुसुवर्णदानं गोविन्दकीर्तेर्न समं शतांशैः ॥

गोविन्देति सदा स्नानं गोविन्देति सदा जपः ।
गोविन्देति सदा ध्यानं सदा गोविन्दकीर्तनम् ॥

गोविन्दो दुःखनाशाय भयनाशाय माधवः ।
वामनः पापनाशाय केशवः क्लेशनाशनः ॥

गोविन्द गोविन्द हरे मुरारे गोविन्द गोविन्द मुकुन्द कृष्ण ।
गोविन्द गोविन्द रथाङ्गपाणे गोविन्द गोविन्द नमामि चेतः ॥

इति प्रातस्स्मरणम् ।

—o—

## स्वापकाले जप्यमन्त्रः ।

अपसर्प सर्प भद्रं ते दूरं गच्छ महाविष ।
जनमेजययज्ञान्ते चास्तीकवचनं स्मरन् ॥

जरत्कारोर्जरत्कार्वां समुत्पन्नो महायशाः ।
अस्तीकस्सत्यसन्धो मां पन्नगेभ्योऽभिरक्षतु ॥

इति स्वापकाले जप्यमन्त्रः ॥

## अधीतस्य अविस्मरणमन्त्रः ।

वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः ।
तावन्ति हरिनामानि कीर्तितानि न संशयः ।
यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ।
तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते ॥

विसर्गबिन्दुमात्राणि पदपादाक्षराणि च ।
न्यूनानि चातिरिक्तानि क्षमस्व पुरुषोत्तम ॥

निर्जित्य वादसमये ऋषीन्सर्वानुपस्थितान् ।
गावो येन हृतास्तस्मै नमोऽस्तु ब्रह्मरातये ॥

अथातोऽधीत्याधीत्यानिराकरण । प्रतीकं मे
विचक्षणम् । जिह्वा मे मधुयद्वचः ।
कर्णाभ्यां भूरि शुश्रुवे । मा त्वꣳहार्षीꣳश्रुतं मयि ।
ब्रह्मणः प्रवचनमसि । ब्रह्मणः प्रतिष्ठानमसि ।
ब्रह्मकोशोऽसि सनिरसि । शान्तिरस्य निराकरणमसि ।
ब्रह्मकोशं मे विश । वाचा त्वाऽपिदधामि । वाचा
त्वाऽपिदधामि । तिष्ठप्रतिष्ठ । स्वरकरण कण्ठयौरस
दन्त्यौष्ठ्यग्रहणधारणोच्चारणशक्तिर्मयिभवतु ।
आप्यायन्तु मेऽङ्गानि वाक्प्राणश्चक्षुः श्रोत्रँयशो बलम् ।
यन्मे श्रुतमधीतं । तन्मे मनसि तिष्ठतु तिष्ठतु ॥

इति अधीतस्य अविस्मरणमन्त्रः ॥